## 81 - एकाशीतितम दशकम्
## नरकासुर वधम्, सुभद्रा हरणम् च

स्निग्धां मुग्धां सतत मपि तां लालयन् सत्यभामां
यातो भूयस् सह खलु तया याज्ञसेनी विवाहम् ।
पार्थ प्रीत्यै पुनरपि मना गास्थितो हस्ति पुर्यां
शक्र प्रस्थं पुर मपि विभो संविधा यागतोऽ भूः ॥ ॥81-1॥

भद्रां भद्रां भव दवरजां कौरवे णार्थ्य मानां
त्वद् वाचा तामहृत कुहना मस्करी शक्र सूनुः ।
तत्र क्रुद्धं बल मनुनयन् प्रत्यगास् तेन सार्धं
शक्र प्रस्थं प्रिय सख मुदे सत्यभामा सहायः ॥ ॥81-2॥

तत्र क्रीडन् नपि च यमुना कूल दृष्टां गृहीत्वा
तां कालिन्दीं नगर मगमः खाण्डव प्रीणि ताग्निः ।
भ्रातृ त्रस्तां प्रणय विवशां देव पैतृष्वसेयीं
राज्ञां मध्ये सपदि जहृषे मित्र विन्दा मवन्तीम् ॥ ॥81-3॥

सत्यां गत्वा पुन रुदवहो नग्नजिन् नन्दनां तां
बध्वा सप्तापि च वृष वरान् सप्त मूर्तिर् निमेषात् ।
भद्रां नाम प्रददु रथ ते देव सन्तर्द नाद्याः
तत् सोदर्याम् वरद भवतस् साऽपि पैतृष्वसेयी ॥ ॥81-4॥

पार्थाद्यै रप्यकृत लवनं तोय मात्राभि लक्ष्यं
लक्षं छित्वा शफर मवृथा लक्ष्मणां मद्र कन्याम् ।
अष्टा वेवं तव समभवन् वल्लभास् तत्र मध्ये
शुश्रोथ त्वं सुरपति गिरा भौम दुश्चेष्टितानि ॥ ॥81-5॥

स्मृता यातं पक्षि प्रवर मधि रूढस् त्व मगमः
वहन् नङ्के भामा मुपवन  मिवा राति भवनम् ।
विभिन्दन् दुर्गाणि त्रुटित पृतना शोणित रसैः
पुरं तावत् प्राग्ज्योतिषम् अकुरुथाष् शोणितपुरम् ॥ ॥81-6॥

मुरस् त्वां पञ्चास्यो जलधि वन मध्या दुदपतत्
स चक्रे चक्रेण प्रदलित शिरा मङ्क्षु भवता ।
चतुर् दन्तैर् दन्तावल पति भिर् इन्धान समरं
रथाङ्गेन छित्वा नरक मकरोस् तीर्ण नरकम् ॥ ॥81-7॥

स्तुतो भूम्या राज्यं सपदि भगदत्तेऽस्य तनये
गजञ्चैकं दत्वा प्रजिघयिथ नागान् निजपुरीम् ।
खले नाबद्धानां स्वगत मनसां षोडश पुनः
सहस्राणि स्त्रीणां अपि च धनराशिं च विपुलं ॥ ॥81-8॥

भौमापाहृत कुण्डलं तददितेः दातुं प्रयातो दिवं
शक्राद्यैर् महितस् समं दयितया द्यु स्त्रीषु दत्त ह्रिया ।
हृत्वा कल्पतरुं रुषाभि पतितं जित्वेन्द्र मभ्यागमः
तत्तु श्री मद दोष ईदृश इति व्याख्यातु मेवा कृथाः ॥ ॥81-9॥

कल्पद्रुं सत्यभामा भवन भुवि सृजन् द्व्यष्ट साहस्र योषाः
स्वीकृत्य प्रत्यगारं विहित बहु वपुः लालयन् केलि भेदैः ।
आश्चर्यान् नारदा-लोकित विविध गतिः तत्र तत्रापि गेहे
भूयस् सर्वासु कुर्वन् दश दश तनयान् पाहि वातालयेश ॥ ॥81-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥